**|| श्री स्वामी समर्थ ||**

---

## ||त्वरित फलदायी मातंगी कवचम|

---

देव्युवाच
साधु साधु महादेव कथयस्व सुरेश्वर।
मातंगी कवचं दिव्यं सर्वसिद्धिकरं नृणाम् ॥
ईश्वरो वाच
शृणु देवि प्रवक्ष्यामि मातंगी कवचं शुभम्।
गोपनीयम् महादेवि मौनी जापं ममाचग्त् ॥
विनियोग
अस्य श्रीमातंगी कवचस्य दक्षिणामूर्ति ऋषि र्विराटछन्दो ,
मातंगी देवत चतुर्वर्गसिद्धये पाठे विनियोगः ॥

अथ कवचम्
ॐ शिरो मातगिनी पातु भुवनेशी तु चक्षुषी ।
तोडला कर्णयुगलं त्रिपुरा वदनं मम॥
पातु कण्ठे महामाया हृदि माहेश्वरी तथा।
त्रिपुष्पा पाश्वयोः पातु गुदे कामेश्वरी मम ॥
ऊरुद्वये तथा चण्डी जंघयोश्च हरप्रिया ।
महामाया पादयुग्मे सवगिषु कुलेश्वरी ॥
अंगं प्रत्यंगकं चैव सदा रक्षतु वेष्णवी।

ब्रह्मरन्धे सदा रक्षेन्मातंगीनाम संस्थिता ॥
रक्षेनित्यं ललाटे सा महापिशाचिनीति च।
नेत्रयोः सुमुखी रक्षेदेवी रक्षतु नासिकाम् ॥
महापिशाचिनी पायान्मुखे रक्षतु सर्वदा ।
लज्जा रक्षतु मां दन्ताञ्चोष्ठौ सम्मार्जनीकरा ॥
चिबुके कण्ठदेशे च ठकापत्रितयं पुनः।
सविसर्गं महादेवि हृदयं पातु सर्वदा ॥
नाभिं रक्षतु मां लोला कालिकावतु लोचने।
उदरे पातु चामुण्डा लिन्गे कात्यायनी तथा ॥
उग्रतारा गुदे पातु पादौ रक्षतु चाम्बिका।
भुजौ रक्षतु शर्वाणीं हदयं चाण्डभूषणा ॥
जिह्वायां मातृका रक्षेत्पूर्वे रक्षतु पुष्टिका,
विजया दक्षिणे पातु मेधा रक्षतु वारुणे॥
नैऋत्यां सुदया रक्षेद् रक्षेद्यव्यां पातु लक्ष्मणा ।
ऐशान्यां रक्षेन्मां देवी मातंगी शुभकारिणी
रक्षेत्सुरेशी चाग्नेये बगला पातु चोत्तरे।
ऊर्ध्वं पातु महादेवि देवानां हितकारिणी ॥
पाताले पातु मां नित्यं वशिनी विश्वरूपिणी ।
प्रणवं च तमोमाया कामबीजं च कूर्चकम्॥
मातगिनी डेयुतास्त्रं वन्हिजाया वधिर्मनुः।
साद्धैकादशवर्णा सा सर्वत्र पातु मां सदा॥

इति ते कथितं देवि गुह्याद् गुह्यतरं परम्।
त्रेलौक्यमंगलं नाम कवचं देवदुर्लभम्॥

य इदं प्रपठे नित्यं जायते संपदालयम्।
परमैश्वर्यमतुलं प्राप्नुयान्नात्र संशयः ॥
गुरुमभ्यर्च्य विधिवत् कवचं प्रपटेद्टयादि।
एश्वर्य सुकवित्वं च वाक्सिद्धिं लभते धुवम् ॥
नित्यं तस्य तु मातंगी महिला मंगलं चरेत्।
ब्रह्मा विष्णुश्च रुद्रश्च ये देवाः सुरसत्तमाः ॥
ब्रह्मराक्षस वेताला ग्रहाद्या भूतजातयः।
तं दृष्ट्वा साधकं देवि लचज्जायुक्ता भवन्ति ते ॥
कवचं धारयेद्यस्तु सर्वासिद्धि लभेद् धृवम्।
राजा नोऽपि च दासत्वं षट्कर्माणि च साध्येत् ॥
सिद्धो भवति सर्वत्र किमन्यैः बहुभाषितैः।
इदं कवचपज्ञात्वा मातंगी यो भजेन्नरः॥
अल्पायुर्निद्धिनो मूर्खे भवत्येव न संशयः,
गुरौ भक्तिः सदा कार्या कवचे च दढा मतिः।
तस्मै मातगिनी देवी सर्वसिद्धि प्रयच्छति ॥

॥ इति नन्द्यावते उत्तरखण्डे त्वरित फलदायिनी मातंगिनी कवचम् ।

---

॥ श्री गुरुदत्तात्रेयार्पणमस्तु ॥
|| श्री स्वामी समर्थार्पर्ण मस्तु||

---